# "पाणिनीयसिद्धहेमशब्दानुशासनयोः समाससूत्राणां तुलनात्मकमध्ययनम्"

(Comparative study of compound formulas
of Paniniya and siddhahemshabdanushasan)

श्री सोमनाथ संस्कृत युनिवर्सिटी, वेरावलम्
इत्यस्य विद्यावारिधिः **(Ph.D)** इत्युपाधये प्रस्तुतो महाशोधनिबन्धः

A Thesis Submitted

To

Shree Somnath Sanskrit University

For the Award of

Degree of Doctor of Philosophy (Ph.D.) / Vidyavaridhi

मार्गदर्शकः
प्रो. विनोद कुमार झा
अध्यक्षः, व्याकरणविभागः
श्री सोमनाथ संस्कृत युनिवर्सिटी
वेरावलम् - गुजरातप्रदेशः

प्रस्तोता
द्रुमिलकुमार दिनेशभाई पण्ड्या
(नव्य-व्याकरणाचार्यः)
शिक्षकः, श्री नाघेडी कुमार शाला,
नाघेडी - जामनगरम्

**Shree Somnath Sanskrit University**

# ॥ मार्गदर्शकस्य प्रमाणपत्रम् ॥

# Certificate of Guide

This is to certify that Mr. **DRUMILKUMAR DINESHBHAI PANDYA** of Shree Somnath Sanskrit University - Veraval has carried out his research work under my guidance and supervision. The title of his thesis is

"पाणिनीयसिद्धहेमशब्दानुशासनयोः समाससूत्राणां तुलनात्मकमध्ययनम्"

**(Comparative study of compound formulas of Paniniya and siddhahemshabdanushasan)**

The thesis submitted is a record of original research work done by the student and it represents independent research work on the part of the student.

No part of the thesis was submitted for the award of any degree or diploma prior to this date.

विनोद कुमार झा

मार्गदर्शकः

प्रो. विनोद कुमार झा

अध्यक्षः, व्याकरणविभागः

श्री सोमनाथ संस्कृत युनिवर्सिटी

वेरावलम् - गुजरातप्रदेशः

Date : 21-09-2020

Place : वेरावल

# ॥ प्रतिज्ञापत्रम् ॥

## Declarations by Ph.D. Candidate/Pratijnapatram

I **DRUMILKUMAR DINESHBHAI PANDYA** here with declare that the research work presented in the thesis entitled as

"पाणिनीयसिद्धहेमशब्दानुशासनयोः समाससूत्राणां तुलनात्मकमध्ययनम्"

**(Comparative study of compound formulas of Paniniya and siddhahemshabdanushasan)**

has been carried out by me under the guidance of Prof. **VINODKUMAR JHA**

of **Shree Somnath Sanskrit University - Veraval**

I agree to allow the University to upload the electronic version of my Ph.D. thesis on a public access website.

The thesis being submitted by me is a record of original research work and it represents independent research work on my part. No part of the thesis was submitted by me for the award of any degree or diploma prior to this date.

प्रस्तोता
द्रुमिलकुमार दिनेशभाई पण्ड्या
(नव्य-व्याकरणाचार्यः)
शिक्षकः, श्री नाघेडी कुमार शाला,
नाघेडी - जामनगरम्

Date : 21-9-2020
Place : Jamnagar

Shree Somnath Sanskrit University
**(Estd. by Government of Gujarat)**
Rajendra Bhuvan Road, **Veraval - 362 266**, District : Gir-Somnath (Gujarat)
Phone : 02876 - 244532 Fax : 02876 - 244417, E-mail : sssu.veraval@gmail.com
Website : www.sssu.ac.in

Ref. No.

Date :

# DUPLICATE

## Ph.D.Registration Certificate

Ph.D.Registration No :-116

Ph.D.Registration Date :-23/09/2014

This is to certify that **PANDYA DRUMILKUMAR DINESHBHAI** has remained present before Research Discussion Committee (R.D.C.) of this University on 15/04/2014. He has been allotted Prof. VinodKumar Jha of this University as his Research Supervior (Ph.D.Guide). The Title of Research finalized in R.D.C. and allotted to him is " पाणिनीयसिद्धहेमशब्दानुशासनयोः समाससूत्राणां तुलनात्मकमध्ययनम् "

Tentative date of completion of his Ph.D. is 22/09/2017

(Dr.Dashrath Jadav)
Registrar

Registrar Office

Shree Somnath Sanskrit University
(Estd. by Government of Gujarat)
Rajendra Bhuvan Road, **Veraval - 362 266.** District : Gir - Somnath. (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417
Website : www.shreesomnathsanskrituniversity.info

Ref No. SSU/Ph.D/Certi/6065 /2014 6085

Date: Date: -27/08/2014

# CERTIFICATE

This is to certify that Mr./Ms/Mrs.PANDYA DRUMILKUMAR DINESHBHAI has passed Ph.D. Entrance Test and he/she has successfully completed Ph.D. Course Work organized by Shree Somnath Sanskrit University, Veraval (As per U.G.C. Minimum Standards and Procedure for the Award of Ph.D. Degree, Regulation 2009) during 2 May 2014 to 9 May 2014.

Date:-
Place:-

REGISTRAR,
Shree Somnath Sanskrit University
Veraval, Dist. Junagadh (Gujarat)

(GUJARAT)
362 266

॥ ऋणस्वीकृतिः ॥

संशोधनकार्येऽस्मिन् विषयसम्बन्धितानामापदामपहरणाय तथा प्राप्ताप्राप्तग्रन्थानां प्रापणाय यस्य सहयोगो मार्गदर्शनं च प्राप्तं तथाविधं । मार्गदर्शक प्रो.विनोदकुमार झा (अध्यक्षः , व्याकरणविभागः, श्री सोमनाथ संस्कृत युनिवर्सिटी वेरावलम् , गुजरातप्रदेशः ) महोदयस्य चरणकमलेषु पौनः पुन्येन प्रणामं च निवेदयामि । तेषामात्मीयतामभरेण व्यक्तित्वेनैव संशोधनकार्यमिदं पूर्णतां गतम् । जगत्यां महत्कार्यं लघुकार्य वा मानवः क्रियते, मानवो महान् भवति, श्रेष्ठतमं स्थानं प्राप्नोति, उच्चस्थानं प्राप्नोति, पशुतो मानवो भवति, मानवान्महामानवो भवति, महामानवात्परमात्मा भवति । विकासस्याऽस्मिन् पथि स एकलः किमपि कर्तुं न प्रभवति, किन्तु तस्य पृष्ठभागे बह्वीनां शक्तीनां बलम्पीठबलं वा भवत्येव । शोधमहानिबन्धे नैकाकिनां मया निमित्तमात्रेण किमपि कृतमिति तु जानते प्रेक्षावन्तः । सूक्ष्मेक्षिकया यदा दृश्यते चेत् स एव परमात्मा स्वस्यैव कार्य साधयितुं सम्पूर्णमस्तित्वं कार्यरत करोति, सहायताम्पुरस्करोति, सहाय्यतां साक्षात्प्रगटयतीति ह्यनुभूतम्मया । ययोः शुभाशीर्भिस्तथा तयोर्मनोकामनापरिपाकफलरूपमिदं कार्यं पूर्णं जातम्, एतादृशयोमातृपित्रोश्चरणकमलयोः संशोधनकार्यपुष्पमिदं समर्प्य कोटिशो वन्दनं चाकरोमि, तथा च श्रीभागवतविद्यापीठ- कृष्णधाम- सोला -कर्णावत्याः संस्थापकः प.पू.वि.वं. कृष्णशंकरशास्त्रीजी (पू. दादाजी) पूज्यानां चरणयोः अभिवादयामि , येषां वात्सल्यवारिधौ पुत्रवल्लालितेन प्रथमात आरभ्य शिक्षाशास्त्रीपर्यन्तं अध्ययनं कृतम् , अध्ययनानन्तरं जामनगरे अध्यापनार्थं समागते सति येषां अनुग्रहः, महती कृपा च प्राप्ता तादृशाः श्रीमोटीहवेली जामनगरस्य गादीपति परमपूज्याः पुष्टीसिद्धांतसंरक्षकशिरोमणि-आचार्यचरणाः श्रीहरिरायजीमहाराजश्री

॥ अनुक्रमणिका ॥


| क्रम नं. | प्रकरणनामानि | पृष्ठसंख्या |
|---|---|---|
| १ | अध्यायविभाजनम् | ८-११ |
| २ | प्रास्ताविकम् | १२-१५ |
| ३ | प्रथमोऽध्याय: (परिचयात्मक:) | १६-८१ |
| ४ | द्वितीयोऽध्याय: - केवलाव्ययीभावसमास: | ८२ – १०८ |
| ५ | तृतीयोऽध्याय: - तत्पुरुषसमास: | १०९ – १८५ |
| ६ | चतुर्थोऽध्याय: - बहुव्रीहिसमास: | १८६ – २२६ |
| ७ | पञ्चमोऽध्याय: - द्वन्द्वसमास: | २२७ – २४६ |
| ८ | संशोधनाल्लब्ध: परिणाम: | २४७ |
| ९ | उपसंहार: | २४८ |
| १० | सन्दर्भग्रन्थसूचि: | २४९ – २५१ |
| ११ | ग्रन्थ सङ्केत: | २५१ |

॥ श्रीहरिः ॥

अध्यायविभाजनम्

प्रथमोऽध्यायः– परिचयात्मकः

१.१ पाणिनीमुनेः परिचयः

१.१.१ भट्टोजिदिक्षितस्य परिचयः

१.२ पाणिनीयव्याकरणस्य परिचयः

१.३ पाणिनीयव्याकरणेसमासपरिचयः

१.४ श्रीहेमचन्द्राचार्यस्य परिचयः

१.५ सिद्धहेमशब्दानुशासनस्यपरिचयः

१.६ सिद्धहेमशब्दानुशासनेसमासपरिचयः

द्वितीयोऽध्यायः– केवलाव्ययीभावसमासः ॥

पाणिनीयशब्दानुशासनेकेवलाव्ययीभावसमासे

२.१ पठितसूत्राणां तुलनात्मकमध्ययनम्

२.२ पठितवार्तिकानां तुलनात्मकमध्ययनम्

२.३ पठितसूत्रोपरि उदाहरणानां-प्रत्युदाहरणानां तुलनात्मकमध्ययनम्

❖ तृतीयोऽध्यायः – तत्पुरुषसमासः

पाणिनीयशब्दानुशासनेतत्पुरुषसमासे

३.१ पठितसूत्राणां तुलनात्मकमध्ययनम्
३.२ पठितवार्तिकानां तुलनात्मकमध्ययनम्
३.३ पठितसूत्रोपरि उदाहरणाना प्रत्युदाहरणानां तुलनात्मकमध्ययनम्

❖ चतुर्थोऽध्यायः – बहुव्रीहिसमासः

पाणिनीयशब्दानुशासनेबहुव्रीहिसमासे

४.१ पठितसूत्राणां तुलनात्मकमध्ययनम्
४.२ पठितवार्तिकानां तुलनात्मकमध्ययनम्
४.३ पठितसूत्रोपरि उदाहरणानां-प्रत्युदाहरणानां तुलनात्मकमध्ययनम्

❖ पञ्चमोऽध्यायः –द्वन्द्वसमासः

पाणिनीयशब्दानुशासनद्वन्द्वसमासः

५.१ पठितसूत्राणां तुलनात्मकमध्ययनम्
५.२ पठितवार्तिकानां तुलनात्मकमध्ययनम्
५.३ पठितसूत्रोपरि उदाहरणानां
प्रत्युदाहरणानां तुलनात्मकमध्ययनम्

उपसंहारः

संशोधनाल्लब्धः परिणामः

सन्दर्भग्रन्थसूचिः

ग्रन्थ सङ्केतः

प्रास्ताविकम् :-

कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणतः क्लेशनाशाय गोविन्दाय नमो नमः ॥

श्रीद्वारकेश भगवन् भुवनैकवन्द्य
याचे तवाङ्घ्रियुगलं शिरसाभिवन्द्य ।
संसारतापपरितप्तमिदं मनो मे
स्वानन्दकन्दरसपानरतं कुरुष्व ॥

सर्वज्ञानमयस्य भगवतो वेदनारायणस्य अङ्गभूतानि व्याकरणादीनि शास्त्राणि तत्पोषकत्व स्वरूपाणि भवन्ति । अङ्गिनः परिपोषकाणि सहायकानि च अङ्गानि भवन्ति । अङ्गेषु सर्वेषु च मुखस्य प्राधान्यं भवति तद्वत् एव वेदाङ्गेषु वेदपुरुषस्य मुखस्वरूपस्य व्याकरणस्य मुख्यत्वं प्रधानत्वं भवति । अस्य व्याकरणशास्त्रस्य विविधेषु प्रमुखप्रयोजनेषु लाघवमपि अन्यतमं प्रयोजनं भवति ।

यथोक्तं महाभाष्ये :-

रक्षोहागमलघ्वसन्देहाः प्रयोजनम् " इति - (म.भा.प.आ.)

अत्र प्रयोजनसमूहेषु लघु इति लाघवं प्रयोजनमुच्यते । भाषायां प्रयोज्यमानेषु वाक्येषु समासाश्रयेण लाघवसिद्धिः जायते । ' अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः ' ( परि.शे.) । वैयाकरणानामित्थं लाघवप्रियत्वं सुप्रसिद्धमस्ति । न केवलं वैयाकरणा एव अपि तु प्रायेण मनुजाः लाघवप्रियाः कर्मसु दृश्यन्ते । यद्यपि फलावाप्तौ तु आधिक्यकामाः दृश्यन्ते तथापि उपायेषु कर्मसु लाघवमभिलपन्ति ॥

❖ समासस्वरूपम् :-

समासस्य सर्वेषु पाठ्यक्रमेषु निवेशो भवति । तेन अपि समासप्रकरणस्य विशिष्टं महत्वं सिद्ध्यति । सम् इति उपसर्गपूर्वकस्य असु क्षेपणे इत्यस्य धातोः भावार्थके घञि परे ' अत उपधायाः ' इति सूत्रेण उपधा वृद्धौ समास इति शब्दः निष्पद्यते । संक्षेपः संक्षेपीकरणम् इति तात्पर्यतः समासपदस्यार्थः । ' समसनं समासः ' (ल.सि.) बहूनां पदानामेकपदत्वं समासे जायते तेन एकार्थीभावरूपं सामर्थ्यं भवति । समासे जाते सति ' कृतद्धितसमासाश्च ' इति सूत्रेण प्रातिपदिकसंज्ञायां जातायां सुपो धातुप्रातिपदिकयोः इति सूत्रेण प्रातिपदिकावयभूतानां सुपां प्रत्ययानां लोपः जायते । पुनश्च प्रातिपदिकत्वादेव सुबुत्पतौ पदसिद्धिः भवति । एवञ्च तदेकं एव पदं समासे जायते वैदिकस्वरूपप्रक्रियायां सामासिकं एकं पदं मत्वा उदात्तादयः स्वरा विधीयन्ते । समासस्य स्वरूपविषये इयं कारिका प्रसिद्धा अस्ति । पदानां लुप्यते यत्र प्रायः स्वाः विभक्तयः । पुनरेक पदीभावः समासः उच्यते तदा ॥ समासत्वात् एकपदत्वं एकस्वरत्वं चेति समासस्य प्रयोजनं काशिकाकारैरपि प्रकाशितमस्ति । ' यथा ' समासस्य प्रयोजनमैकपद्यमैक्स्वर्यञ्च ' । गङ्गायाः जलम् इति विग्रहवाक्यस्य षष्ठीतत्पुरुषसमासे गङ्जलमिति एकपदं भवति । एकपदत्वादेकः स्वरः उदात्तः जायते अन्ये स्वराः अनुदात्तं पदमेकवर्जम् इति एकं उदात्तं स्वरं वर्जयित्व अवशिष्टा स्वराणामनुदात्तत्वं भवति ॥

❖ समासस्य प्रकाराः :-

केवलसमासः, अव्ययीभावसमासः, तत्पुरुषसमासः, बहुव्रीहिसमासः, द्वंद्वसमासः इमे समासस्य प्रकाराः सन्ति । समासप्रकाराणां एकस्मिन् पद्ये सुन्दरं निरूपणमस्ति सार्थं संज्ञानिर्देशपूर्वकं प्रसिद्धमस्ति :-

श्लोको यथा :-

द्वन्द्वोऽस्मि द्विगुरपि चाहं , गृहे च सततमव्ययीभावः ।

तत्पुरुष कर्मधारय येनाऽहं स्यां बहुव्रीहिः ॥

अर्थात् कश्चित् निर्धनो ब्राह्मणः नृपं प्रति स्वां दशां निरुपयति , हे राजन् ! अहं द्वंद्वः सभार्यः युगलस्वरूपः अस्मि , द्विगुः धेनुद्वययुक्तः अपि अस्मि , परन्तु ममा गेहे नित्यं अव्ययीभावः अर्थात् धनाभावात् व्यवसायसामर्थ्याभावात् अव्ययीभावः अस्ति अर्थात् अहं किमपि व्ययं कर्तुं न प्रभवामि हे पुरुषश्रेष्ठ ! तत् कर्मधारयं येन अहं बहुव्रीहिः प्रचुरधान्यः भवेयम् इत्थं पद्येनैकेन सुन्दरः वृतान्तः एवं समासप्रकारसंज्ञाः इत्युभयमपि निरुपितं दृश्यते ॥

❖ समासे सामर्थ्यविचारः :-

समासः पदविधिः विद्यते । यो यो पदविधिः सः समर्थाश्रित एव भवति । सामर्थ्याभावे पदविधिः न सम्भवति । एतद्विषयिणी परिभाषा विद्यते ' समर्थः पदविधिः ' ( 2/1/1/) इति एतस्य सूत्रस्य उपरि समर्थाह्निकमिति एकं महाभाष्ये आह्निकं विद्यते । परिभाषा पुनः एकदेशस्थिता सती कृत्स्नं शास्त्रमभिज्वलयति प्रदीपवत् । तद्यथा प्रदीपः सुप्रज्वलितः एकदेशस्थः सर्वं वेश्माभिज्वलयति (म.भा.२,१,१ ) एतन्नियमानुरोधेन परिभाषा इयं समर्थः पदविधिः इति समग्रमेव पाणिनीय सूत्राष्टाध्यायी व्याकरणम् अभिज्वलयति ।

सामर्थ्यं द्विविधं भवति तत्र व्यपेक्षाभावरूपं सामर्थ्यं वाक्ये भवति एवं समासे तु एकार्थीभावरूपं सामर्थ्यं भवति । एकार्थीभावे सामर्थ्ये सामासे मिलितानां पदानां एकार्थो

भवति समस्ततया । एकार्थीभावेन सम्बद्धार्थे राजपुरुषः इत्यादि पदे राजः इत्यंशे विशेषणयोगो न भवति यतो हि

उक्तं यथा – ' सविशेषणानां वृत्तिर्न वृत्तस्य वा विशेषणयोगो न ' (म.भा. २/१/१) । यद्यप्ययं नियमः अस्ति वृत्तस्य विशेषणयोगो न भवति इति तथा अपि नित्यं सापेक्षेषु शब्देषु वृत्तावपि विशेषणयोगो दृश्यते , तद्यथा –

' देवदत्तस्य गुरूकुलम् , देवदत्तस्य गुरुपुत्रः , यज्ञदत्तस्य पितृकुलम् , देवदत्तस्य दासभार्या इत्यादिषु प्रयोगेषु वृत्तानां विशेषणयोगो दृश्यते । तदुक्तं यथा – ' सम्बन्धि शब्दः सापेक्षो नित्यं सर्वः समस्यते । वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते ( वृत्तिसमुद्देशः -४७ ) ॥

समर्थः पदविधिः इति परिभाषा पदसम्बन्धिनी विद्यते अतः वर्णविधौ नास्याः प्रवृत्तिः भवति अतः तिष्ठतु दध्यशानत्वं तक्रम् इति वाक्ये वर्णविधौ इको यणचि इति यण् सन्धिः सामर्थ्याभावे अपि प्रवर्तते ॥

❖ समासानां महत्वम् :-

भाषाप्रयोगे बहुत्र बहुधा समासानां प्रयोगो विधीयते समासेन लघुना प्रयत्नेन अधिकार्थाभिव्यक्तिः कर्तुं शक्यते । साहित्यशास्त्रे तु विशेषतः उपमाद्यलङ्कार-प्रयोगेषु कादम्बर्यादिगद्यग्रन्थेषु चम्पूकाव्येषु महाकाव्येषु अनेकशः सामासिकपदानां प्रयोग प्राचुर्यं समुपलभ्यते इत्थं समासस्य महत्वपूर्णं स्थानं शास्त्रे-संस्कृतवाङ्मये च विलोक्यते ॥

॥ इति शुभम् ॥

अथ प्रथमोऽध्यायः

( परिचयात्मकः )

महर्षिपाणिनिमुनेः जीवनपरिचयः-

संस्कृतभाषा सर्वासु भाषासु प्राचीनमेति सुविदितं वर्तते । अतः संस्कृतभाषायाः व्याकरणमपि प्राचीनतममस्ति। सर्वेषु प्राचीनव्याकरणेषु पाणिनीयव्याकरणमेव साङ्गोपाङ्गं सुव्यवस्थितरूपेण प्राप्यते । लौकिकवैदिकशब्दानामुपदेशेन सर्वेषु व्याकरणेषु अन्यतमं – प्रधानञ्च वर्तते । संस्कृतमतिरिच्य कस्यामपिभाषायमेतादृशं परिष्कृतं सुव्यवस्थितं व्याकरणं नास्ति। अतः यावत् विश्वस्मिन् संस्कृतभाषायाः अध्ययनम् अध्यापनं चलति तावत् पर्यन्तं पाणिनीयव्याकरणस्यास्तित्वं निश्चितमस्ति।

अस्माकं प्राचीनाचार्याणाम् ऋषिमहर्षिणां परिचयः जीवनवृत्तकालज्ञानं प्राप्तुं दुष्करं किन्तु तथापि पूर्वविदुषां बहुप्रयत्नेन एतद् सुकरं जातमस्ति। यदि अपि पाणिनि मुनिना स्वकीयपरिचयादिविषये किमपि न उल्लिखितं तथापि परवर्तिषु व्याकरणसम्प्रदायेषु अमुष्य नाम सर्वत्र दृशोर्विषयतां याति । यद्यपि अनेन स्वकीयपरिचयादिविषये क्वापि किमपि नोल्लिखितं तथापि परवर्तिभिराचार्यैः परश्शतैः प्रयत्नैरेतस्य परिचयादिकं जीवनवृत्तान्तं यथा स्थिरीकृतं तथा अत्र निर्दिश्यते ।

पाणिनेः नामानि-

पाणिनेः षड्नामानि विख्यातानि सन्ति।[1]

[1] पाणिनिस्त्वाहिकोदाक्षिपुत्रःशालङ्कि पाणिनौ वैजयन्ती पृ.६५

१ पाणिन्  २ पाणिनि: ३ दाक्षीपुत्र: ४ शालङ्कि: ५ शालातुरीय: ६ आहिक: (याजुषशिक्षापाठे) ७ पाणिनेय:  नाम दृश्यते । पणिपुत्र: इत्यपि व्यवहारे दृश्यते ।

१ पणिन् इदं नाम काशिकायां चान्द्रवृत्तौ च दृश्यते[2] । पणिन् इति नकारान्त शब्दात् गथिविदथिकेशिपणिनश्च इति सूत्रेण प्रकृत्यर्थे अण् प्रत्ययेन निष्पन्नोऽयं शब्द: ।

२ पाणिनि: इदं नाम ग्रन्थकारस्य लोकविश्रुतं नाम अस्ति। पणिनोऽपत्यमित्यण् पाणिन:। पणिनस्य अपत्यं युवेति इञ् प्रत्ययेन पाणिनि:। पणिनो गोत्रापत्यं पाणिनि:।

३ दाक्षीपुत्र: महाभाष्यकृष्णचरितपाणिनीयशिक्षासु[3] इदं नाम प्राप्यते।

४ शालङ्कि: शिवदत्तशर्मण: मतानुसारम् इदं नाम पितृव्यपदेशजोऽस्ति। कोशं विहाय एतत् नामाभिधानमन्यत्र न प्राप्यते।महाभाष्यकारस्तु '  शालङ्केर्यूनश्छात्राः शालङ्का: इति निर्दिशति ।

५ शालातुरीय: पाणिने: एतन्नाम ध्रुवसेनस्य द्वितीयसंवते ताम्रशासने काव्यालंकारे न्यासटिकायां गणरत्नमहोदधौ च प्राप्यते।

६ आहिक: एतस्य नाम्न: प्रयोग: कोशं विहाय अन्यत्र न दृश्यते[4] ।

---

[2].पाणिनोपज्ञकालकं व्याकरणं पणिनो भक्तिरस्य इति पाणिनीयः ।

[3].सर्वे सर्वापदादेशाः दाक्षीपुत्रस्य पाणिनेः महाभाष्ये १/१/२०

[4].सं. व्या. इतिहासः पृ.२०७ २०८ २०९

पाणिनेः जीवनयात्रा -

पाणिनेः पितुः नाम शलङ्कः आसीत्। महर्षिपतञ्जलिना महाभाष्ये पाणिनेः दाक्षीपुत्रेति नाम्ना स्मरणं कृतमस्ति। दाक्षीपुत्रस्य पाणिनेः। पाणिनेः मातुलस्यनाम दाक्षायणः आसीत् । पाणिनेः मातामहस्य नाम व्यड आसीत्। पाणिनेः अनुजस्य नाम पिङ्गलः आसीत्। पाणिनेः आचार्यस्य नाम वर्षः आसीत्।

अथ वर्षस्य कालेन शिष्यवर्गो महानभूत्।

तत्रैक पाणिनिर्नाम जडबुद्धितरोऽभवत्॥ (कथासरित्सागर १-३-२०)

कथासरित्सागरानुसारेण पाणिनेः शिष्यस्य नाम कौत्सः आसीत्। उपसेदिवान् कौत्सः पाणिनिम् । काशिकाकारोऽपि अनूषिवान् कौत्सःपाणिनिम्। उपशुश्रुवान् कौत्सः पाणिनिम् इत्यादिभिः उदाहरणैः ज्ञायते यत् पाणिनेः कश्चित् कौत्सः नामक शिष्यः आसीत्।

देशः

पाणिनेः एकं नाम शालातुरियः अस्ति। लिखितञ्च गणरत्नमहोदधौशलातुरो नाम ग्रामः सोऽभिजनस्यास्तीति शालातुरीयः। पुरतत्वविदुषां मतानुसारं वर्तमानस्थ लाहोरग्रामस्य प्राचीननाम शलातुरः असीत्।केचन विद्वांसः पाणिनेर्वासभूमिं वाहिक इति स्वीकुर्वन्ति । स्कन्दपुराणानुसारं पाणिनिः गोपर्वतस्थाने तपस्याञ्चकार ।

गोपर्वतमितिस्थानं शम्भोः प्रख्यापितं पुरा ।

यत्र पाणिनिना लेभे वैयाकरणिकाग्र्यता॥ ( स्कंदपुराण)

कालः

वस्तुतः भारतीयप्राचीनविदुषां कालगणनं दुष्करं तथापि बहुधा विदुषां यत्नेन किञ्चित् सौकर्यं जातमस्ति। तथापि पाणिनेः कालसम्बन्धकथा निर्धारणं कर्तुं न शक्यते।

आर्यमञ्जुश्रीकल्पे लिखितमस्ति यत्- तस्याप्यन्यतमः सख्यः पाणिनिर्नाम माणवः आसीत्।

कथासरित्सागरानुसारेण - पाणिनिः महाराजनन्दस्य समकालिकः आसीत्।[5] यतो हि अनेकविदुषां मतानुसारेण पाणिनिमुनिः बुद्धात् पूर्ववर्ती आसीदिति। कारणं भगवान् बुद्धस्य समये पाली एव प्राकृतभाषे जनसाधारणी आस्ताम्। अष्टाध्यायी अन्तःसाक्ष्येण सुतरां सिद्धं भवति यत् पाणिनिकाले उदात्तादि स्वरयुक्ता परिष्कृता संस्कृता जनभाषा आसीत्। महामुनिपाणिनिनापि अष्टाध्यायामनेक सूत्राणि भाषाशब्देन रचितानि सन्ति।

पाश्चात्यविद्वान् गोल्डस्टूकरमहोदयस्य मतानुसारं पाणिनेः कालः ई० स० पूर्वं सप्तमीशताब्दी स्वीकृता अस्ति। वेबर तथा कीथ महोदयेनापि पाणिनेः कालः ई० स० पूर्वं ४ तः सप्तमी शताब्दी पर्यन्तं स्वीकृतः वर्तते।[6] भारतीयविद्वांसः रामकृष्णगोपालभाण्डारकरादिभिः अपि पाश्चात्यमतानुसरणं कृतमस्ति। वासुदेवशरणअग्रवालमहोदयेन ई० स० तः ४५०वर्षं पूर्वं पाणिनेः कालनिर्धारणं प्रतिपादितं। किन्तु भारतीयपरम्परायाः विवेचकः युधिष्ठिरमीमांसकमहोदयः स्व अनेकयुक्त्या पाणिनेः कालः विक्रमात् २९०० पूर्वं निर्धारणं कृतवन्तः। अनेन प्रकारेण पाणिनेः समयः अधुनापि विवादास्पद एव प्रतिभासते।

---

५. कथासरित्सागर -१ तरङ्ग- ४।

६. सं.व्या इति पृ. २०३

७. सं व्या इति पृष्ठ - २०३

पाणिनिविषयक किं वदन्ति

कथासरित्सागरानुसारेण पूर्वं पाणिनिः जडमतिः आसीत् । अतः सर्वसहाध्यायिनः पाणिनेः उपहासं कुर्वन्ति स्म। अतः गुरुपत्न्या प्रेरितः पाणिनिः भगवान्शङ्करस्य तपस्यामकरोत् ।

कथासरित्सागरे यथा-

अथ वर्षस्य कालेन शिष्यवर्गो महानभूत्।

तत्रैकः पाणिनिर्नाम जडबुद्धितरोऽभवत्॥(कथासरित्सागर १-३-२०)

स शुश्रूषा परिक्लिष्टः प्रेषितो वर्षभार्यया।

अगच्छत् तपसेखिन्नं विद्याकामे हिमालयम् ॥

प्रसन्नः भगवान्शङ्करः तस्मै डमरुनादेन चतुर्दशसूत्राणि अयच्छत्।
तेन पाणिनिः अष्टाध्यायीनामकम् अद्वितीयं ग्रन्थमरचयत्।

मृत्युः

पाणिनेः किञ्चिन्मात्रम् इतिवृत्तं वयं न जानीमः। पञ्चतन्त्रे प्राचीनग्रन्थात् एकः श्लोकः उद्धृतः। तेन पाणिनेः मृत्युविषये ज्ञातुं शक्यते । सिंहोव्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः। वैयाकरणेषु किंवदन्ति अस्ति यत् पाणिनेः मृत्यु त्रयोदश्यामभवदिति । अतः परम्परागतवैयाकरणाः अद्यापि त्रयोदश्यामनाध्यायेति मनन्ति।

महामुनिपाणिनेः संस्कृतव्याकरणस्य सर्वशास्त्रोपकारकमद्वितीयं सूत्राष्टाध्यायीग्रन्थम् अरचयत्। अद्यावधि संस्कृतवाङ्मये सूत्राष्टाध्यायी विद्युत इव प्रकाशते। एवञ्च पाणिनिः जाम्बवतीविजयनामकं काव्यमरचयत्। तत्र पातालविजय इत्यपर नामापि श्रूयते। अस्य रचयिता पाणिनिर्न वा एतस्य विषये मतभेदः प्रवर्तते। अन्यच्च लण्डनप्रान्तस्य इण्डियाओफिसनामकपुस्तकालयस्थ षड्पत्रात्मकद्विरूपकोशस्य हस्तलेखान्ते इति पाणिनिमुनिनाकृतं द्विरूपकोशं सम्पूर्णम् इति लिखितं वर्तते८।

सूत्राष्टाध्यायी

पाणिनेर्व्याकरणं पञ्चाङ्गव्याकरणमस्ति। उणादिपाठः गणपाठः लिङ्गानुशासनम् पाणिनीयशिक्षा धातुपाठश्च पञ्चव्याकरणाङ्गानि सन्ति। पाणिनेर्व्याकरणस्य मुख्योपजीव्यः आपिशलतन्त्रः अस्ति। पाणिनिना सम्पूर्णा सूत्राष्टाध्यायी संहितापाठरूपेणरचिता वर्तते। यथोक्तं महाभाष्ये –

यथा पुनरियमन्तरतमनिर्वृत्तिः सा किं प्रकृतितो भवति स्थानिन्यन्तरतमेषष्ठीति। आहोस्विदादेशतः स्थाने प्राप्यमाणानामन्तरतम आदेशो भवतीति। कुतः पुनरियं विचारणा। उभयथा हि तुल्या संहिता स्थानेन्तरतम् उरण् रपरः इति। महाभाष्याध्ययनेन ज्ञायते यत् सूत्रपाठः एकस्वरेण पठितोऽस्ति।

---

८ [illegible] पृष्ठ २२

पाणिनितन्त्रस्यादिमं सूत्रं केचन विद्वांस: अथ शब्दानुशासनम् । केचन विद्वांस: वृद्धिरादैच् इति मनन्ति। पाणिनीयाष्टके ३९९६ सूत्राणि सन्ति। यथोक्तं-

त्रीणी सूत्र सहस्राणि तथा नवशतानि च।
षण्णवति: च सूत्राणि पाणिनि: कृतवान् स्वयम्॥

तथाचास्मिनाष्टके षड्प्रकारकाणि सूत्राणि सन्ति।

यथा -

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्॥

पाणिनीयाष्टके व्याकरणातिरिच्य समाजशास्त्र भूगोलेतिहास राजनीतीत्यादि विषयाणां बोधोऽपि जायते।

उक्तं हि-

" समाजशास्त्रावगतिर्भवेदितस्थेतिहासादि नयादि बुध्यते ।
न केवलं पदसिद्धिसंहिता द्विजत्वसम्पादन सच्चिकाद्भुता॥

पाश्चात्यविद्वांसोऽपि पाणिन्याष्टकस्य मुक्तकण्ठेन प्रशंसां कुर्वन्ति। इँग्लेण्डदेशीयप्रोफेसर: मोनियरविलयम्स: कथयति यत्-पाणिन्याष्टकं मानवमस्तिष्कस्य प्रतिभाया: आश्चर्यतमाद्भूता कृतिरस्ति।

अनेन प्रकारेण संस्कृतव्याकरणजगति सूत्राष्टाध्यायी विद्युत् इव प्रकाशते ।

धातुपाठः

दधातिशब्दरुपं यः सः धातुः। महामुनिपाणिनिना धात्वोपदेशः कृतः किन्तु धात्वर्थनिर्देशविषये विदुषां मतमतान्तराणि सन्ति।

धातुपाठपरिचायकं चित्रम् १

पाणिनीयधातुपाठः

धात्वर्थरहितः -लघुपाठः  धात्वर्थसहितः - वृद्धपाठः

---

प्राच्यः  उदीच्यः  दाक्षिणात्यः

सम्प्रतिव्यव्ह्रीयमाणधातुपाठः सायणाचार्यभट्टोजिदीक्षिताभ्यां परिष्कृतोऽस्ति।

गणपाठः

गण संख्याने इत्यस्मात् धातोः निष्पन्नोऽयं शब्दः वर्तते । यस्यार्थः गणना भवति। गणपाठस्योद्भवस्य मूलकारणं संक्षेपीकरणमस्ति। न्यासकारं विहाय -सर्वेवैयाकरणाः गणपाठस्य पाणिनीयत्वं प्रदर्शयन्ति।

ऊणादिपाठः

प्राचीनाचार्ययास्क मतानुसारेण पदं चतुर्धाविभक्तं नामाख्यातोपसर्गनिपातश्च। परं वैयाकरणाः नामख्याताव्ययं स्वीकुर्वन्ति।

---

१ सं ख्या इति – ६७ द्वितीयभागः

कतिपय शब्दानां यौगिकत्वं वा रूढत्वम् इति शङ्का निराकरणाय तत्कालिनवैयाकरणै: उभयो: समन्वयार्थम् उणादिपाठस्य प्रवचनं कृतम्। पाणिने: उणादयो बहुलम् इति सूत्रेण ज्ञायते यत् पाणिनिना अपि उणादिसूत्राणां विवरणं कृतमस्ति।

लिङ्गानुशासनम्

लिङ्गानुशासनेन विना शब्दानामनुशासनम् अपूर्णमस्ति । अत: लिङ्गानुशासनं शब्दानुशासनस्य महत्वपूणमङ्गमस्ति। महामुनिपाणिनिनापि स्वशब्दानुशासनोपयोगी लिङ्गानुशासनस्य प्रवचनं कृतमस्ति।

जाम्बवतीविजयम्

अस्मिन् महाकाव्ये नायक: श्रीकृष्ण: पातालं गत्वा जाम्बवतीं जयति एवञ्च तयो: परिणयकथाया: वर्णनं वर्णितमस्ति। काव्यकारपाणिनि: एवं व्याकरणकारपाणिनयो: एकत्वविषये विद्वद्जनेषु मतभेद: प्रवर्तते। युधिष्ठिरमीमांसकमतानुसारेण एकैव पाणिनि: वर्तते । डॉसत्यकामवर्मा अपि स्वरचित संस्कृतव्याकरण उद्भव: एवं विकास: ग्रन्थे इदं काव्यं वैयाकरणपाणिनि: प्रणितमस्तीति अङ्गीकरोति।

पाणिने: महत्ता

संस्कृतजगति पाणिनीयव्याकरणस्य महोपकारीता वर्तते । सूत्राष्टाध्याया: सूक्ष्माध्ययेन ज्ञायते यत् पाणिनिमुनि: न केवलं शब्दज्ञाता अपि तु वैदिकवाङ्गमयोपरांत भूगोलेतिहास - सर्वशास्त्रलोकव्यवहारदीनामपि ज्ञाता आसीत् । पाणिनिना अष्टाध्यायां प्राचीनसाहित्यस्य उल्लेखोऽपि कृत: वर्तते।

यथा-

दृष्टं साम -[10]शेन दृष्टम् इत्यर्थे प्रयोगः कृतः। वाशिष्ठम् कौञ्चम् ।

तेन प्रोक्तम् [11]पाणिनिना प्रोक्तम् पाणिनीयम्।

ब्राह्मणग्रन्थनिर्देशः- छन्दोब्राह्मणानि च तद्विषयाणि ।[12]

त्रिशंच्चत्वारिंशतोर्ब्राह्मणे संज्ञायाऽण् । [13]

कल्पनिर्देशः- पाराणप्रोक्तेषुब्राह्मणकल्पेषु ।[14]

शिक्षा- शौनकादिभ्यश्छन्दसि ।[15]

अष्टाध्यायी अवलोकनेन ज्ञायते यत् पाणिनिकाले विशालव्याकरण -वाङ्गमयमासीत् । पाणिनिना शब्दानुशासने नामोच्चारणपूर्वकं दशाचार्याणां स्मरणं कृतं वर्तते ।

आपिशलः ६ १ ६२। गार्ग्यः ८ ३ २०। काश्यपः १ २ २५। गालवः ७ १ ७४। चाक्रवर्मणः ६ १ १३०। भारद्वाजः ७ २ ६३। शाकटायनः ३ ४ १११। शाकल्यः १ १ १६। सेनकः ५ ४ ११२। स्फोटायनः ७ ३ ४६।

पा. सू. अष्ट. [10].४ २ ७। [11].४ ३ १०१। [12].४ २ ६६।[13].५ १ ६२। [14].४ ३ १०५। [15].२ ४ ६३।

तथा च उदीचां प्राचां पदैः अनेकवैयाकरणानां निर्देशः कृतोऽस्ति।

निरुक्तम्- यस्कादिभ्यो गोत्रे [१६]

छन्दशास्त्रम्- केवलगणपाठे एव छन्दविषये छन्दोविचति छन्दोमान छन्दोभाषा इतिपर्यायवाचिनः प्राप्यन्ते।

ज्योतिषम्- अष्टाध्यायां नक्षत्राणां निर्देशः ४ २ ३-५-११-१२।४ ३ ३४-३७। सूत्रक्रमाङ्के प्राप्यते।

पुराणेतिहासौ - पाणिनेः कृतप्रकरणेन इतिहासस्य ज्ञानं भवति। तस्यसाक्षान्निर्देशः महान्व्रीह्यपराहणगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु इत्यस्मिन् सूत्रे प्राप्यते। महाभाष्यकारपतञ्जलिः लिखति- प्रमाणभूत आचार्यो दर्भ पवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्। किं पुनरियता सूत्रेण ।[१७]

अन्यच्च- सामर्थ्ययोगान्नहि किंचिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्। वामनजयादित्यौ अपि- महती सूक्ष्मेक्षिकावर्तते सूत्रकारस्य।

प्रसिद्धचीनीयात्रीह्युनसांगः लिखति-ऋषिणा शांतमनसा शब्दभण्डारात् शब्दानिचयित्वा सहस्रश्लोकेषु व्युत्पत्तिम् अरचयत ।[१८]

---

[१६].पा.सू.अ. २ ४६ ३ ।

[१७]. महाभाष्य १११ । [१८]. ह्युनसांगानुवाद भाग-१ पृष्ठ -२२१

पाणिनिः एवं पाश्चात्याः

न केवलं भारतीयाः अपि तु साम्प्रतिकपाश्चात्यविद्वांसोऽपि पाणिनेः मुक्तकण्ठेन भूरी-भूरीप्रशंसां कुर्वन्ति।

सर हण्टर कथयति-संसारेऽस्मिन् व्याकरणेषु पाणिनेः व्याकरणम् अन्यतममस्ति। तस्य वर्णविशुद्धता भाषायाः धात्वान्वयसिद्धान्ताः एवं प्रयोगविधयः अद्वितीया एवञ्चापूर्वास्ति।

लेनिनग्रांडस्य प्रो शेखात्सकी लिखति- इदम् व्याकरणं मानवमस्तिष्कस्य सर्वोत्तमरचनासु अन्यतमा श्रेष्ठास्ति।

कोलब्रुकस्यमतानुसारं  पाणिनेः नियमाः अत्यन्तसतर्कतया सूक्ष्मतया च निर्मिताः सन्ति। एवञ्च तेषां शैली अत्यन्त प्रतिभास्म्पन्नास्ति।

उपसंहारः

शालातुरनिवासी दाक्षीपुत्राचार्यवर्यस्य शिष्यः भगवान्पाणिनिः महेश्वरकृपया जगतितले संस्कृतसंवर्धनाय संरक्षणाय वैज्ञानिकपद्धत्यानुरुपं मानवमस्तिष्कस्य - सर्वोत्तमाकृतिं अष्टाध्यायीं विरच्य महोपकारं कृतवान् । न केवलं भारतीयाः अपि तु पाश्चात्यविद्वांसोऽपि पाणिनेः भूरि-भूरि प्रशंसां कुर्वन्ति। पाणिनिः न केवलं - व्याकरणशास्त्रं किं तु तत्कालीन समाजजीवनं इतिहासपुराणादीविविधशास्त्राणां  भौगोलिक परिदृश्यं चावर्णयत्।

अहन्तु तेषां जीवनकवननिरुपणेऽसमर्थः। तथापि भारतीयविदुषां संशोधनप्रयत्नेन किञ्चित् अल्पप्रयत्नं कृतवान्। तत्तु सूर्यसमक्षं दीपप्रज्वालनमिवास्ति। यतो हि पाणिनिविषये हृद्गता भावना तु नैव वर्णितुं शक्यते।

येन धौता गिरःपुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥

## पाणिनीयव्याकरणपरम्पराविकासक्रमश्च

### व्याकरणोत्पत्तिः-

भाषते अर्थात् प्रकाशते या सा भाषा । भाषैव भाषते जगदिदम्। भाषया विना जगतः कल्पनैव न शक्या । आदौ नित्यावाग् वेदस्वरुपिणी वर्तते। ततः समस्तव्यवहित -भाषाणां प्रयोगः। उक्तं हि व्यासेन-

" अनादिनिधनादिव्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतः सर्वा प्रवृत्तयः॥ " (महाभारत शान्तिपर्व २३ २ ५४)

परं विकासवादिनः पाश्चात्यविद्वांसः एतन्मतं न स्वीकुर्वन्ति। ते तु कालक्रमेण - शब्दापशब्दज्ञानाय व्याकरणस्यावश्यकता जाता। व्याकरणशास्त्रस्योत्पत्ति कदा जाता। तस्योत्तर तु दुष्करमेव । किन्तु रामायणं गोपथब्राह्मणं मुण्डकोपनिषद् महाभारतादीत्यादिषु ग्रन्थेषु अस्य प्रयोगः दृश्यते ।

अतः व्याकरणशास्त्रस्य प्राचीनत्वं सिद्ध्यति।

यथा-गोपथब्राह्मणे

ॐकारं पृच्छाम:। को धातु:। किं प्रतिपदिकं। किं नामाख्यातम्। किं लिङ्गं। किं वचनं। का विभक्ति:। क: प्रत्यय:। क: स्वर:। उपसर्गो निपात:। किं वैव्याकरणम्। को विकार:। को विकरि। कतिमात्र:। कतिवर्ण:। कत्यक्षर:। कतिपद:। क: संयोग:। किं स्थानादानुप्रदानानुकरणम् [१९]। व्याकरणस्यादि वक्ता क: । इति प्रश्नेषु-

भारतीयवाङ्गमये सर्वविद्यानामादि प्रवक्ता ब्रह्मा उक्त:। अत: व्याकरणस्यापि आदि वक्ता ब्रह्मैवास्ति। ऋक्तन्त्रकार: लिखति यत् - ब्रह्माबृहस्पतये प्रोवाच बृहस्पतिरिन्द्राय इन्द्रो भारद्वाजाय भरद्वाज: ऋषिभ्य: ऋषयो ब्राह्मणेभ्य:। इत्थं प्रकारेण व्याकरणस्य प्रचलनमभवत्। ब्रह्मवैवर्तपुराणे प्रकृतिखण्डेऽपि लिखितं वर्तते यत् ।

पप्रच्छ शब्दशास्त्रं च महेन्द्रश्च बृहस्पतिम् ।
दिव्यं वर्षसहस्रं च स त्वा दध्यौ च पुष्करे ॥

तदा त्वत्तो वरं प्राप्य दिव्यंवर्ष सहस्रकम्।
उवाच शब्दशास्त्रं च तदर्थंच सुरेश्वरम्॥ (ब्रह्मवैवर्तपुराणे)

महाभाष्यानुसारं ब्रहस्पतिरिन्द्राय दिव्यंवर्ष सहस्रं प्रतिपदोक्तानं शब्दानां शब्द पारायणं प्रोवाच। व्याकरणवाङ्गमये ऐन्द्रतन्त्रं सर्वाति प्राचीनतममस्ति। तदनु अनेकै: वैयाकरणै: व्याकरणशास्त्रस्य प्रवचनं कृतम्। प्रवचनभेदेन अनेकानां व्याकरणग्रन्थानां रचना अभवत् ।

पाणिने: प्राचीनव्याकरणप्रवक्तार:

पाणिनिना स्वशास्त्रे दशप्राचीनाचार्याणाम् उल्लेख: कृतोऽस्ति।

---

[१९]. गोपथब्राह्मण १-२४७

विविध प्राचीनग्रन्थेषु षोडशाचार्याणां निर्देश: प्राप्यते। प्रातिशाख्यादि

वैदिकवैयाकरणानाहत्य पञ्चाशीति वैयाकरणानां निर्देश: प्राप्यते ।

ऋग्वेदकल्पद्रुमे अष्टानां वैयाकरणानामुल्लेख: दृश्यते[२०] ।

रामायणोत्तरकाण्डे नवव्याकरणानामुल्लेख: प्राप्यते[२१] ।

कविकल्पद्रुमे बोपदेव: अष्टवैयाकरणानमुल्लेख: करोति।

यथा-

इन्द्रश्चन्द्र:काश्कृत्स्नपिशली शाकटायन।

पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिका:॥ (निरुक्तकार: – व्या.शा.इति.)

तथाच-

ब्राह्ममैशानमैन्द्रंच प्राजापत्यंबृहस्पतिम्।

त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टम्॥ (कविकल्पद्रुमे बोपदेव)

श्रीतत्वविधिनामकवैष्णवग्रन्थेऽपि-

ऐन्द्रचान्द्रंकाशकृत्स्नं कौमारं शाकटायनं ।

सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्॥

---

[२०]. व्याकरणेऽप्यष्टविधाभिन्ने लक्षणैकदेशो विक्षिप्तः । पूर्वनिरुक्त वृत्ति पृ. ७८

[२१].सोऽयं नवव्याकरणार्थवेत्ता

पाणिनिस्मृताचार्याः-

आपिशलः काश्यपः गार्ग्यः गालवः चाक्रवर्मणः भारद्वाजः शाकटायनः शाकल्यः सेनकः एवञ्च स्फोटायनः इति ।

प्राचीनग्रन्थोल्लिखिताचार्याः-

महेश्वरः बृहस्पतिः इन्द्रः वायुः भरद्वाजः भागुरिः पौष्करादि चारायणः काशकृत्स्नः शान्तनः व्याघ्रपादः माध्यान्दिनि रौढः शौनकिः गौतम एवं व्याडीति षोडशवैयाकरणाः। प्रातिशाख्यादिवैदिकव्याकरणानां विषये सुद्रढप्रमाणं कुत्रापि नोपलभ्यते।

पाणिनेः अर्वाचीनवैयाकरणाः

पाणिनेः पश्चादपि अनेके आचार्याः व्याकरणसूत्राणि अरचयन् । तेषु निम्नलिखिताचार्याः प्रधानरुपेण वर्तन्ते । अन्येऽपि अप्रसिद्धवैयाकरणाः सन्ति।

| कर्ता | व्याकरणनाम | समयः |
|---|---|---|
| १॥अनिर्णितः | कातन्त्र : | २०००विक्रमसंवत्पूर्व |
| २॥चन्द्रगोमी | चान्द्रः | १००० वि पूर्व |
| ३॥क्षपणकः | क्षपणक | वि प्रथमशताब्दी |
| ४॥देवनन्दी-दिग्वस्त्र | जैनेन्द्र | मं ५०० पूर्व |

५॥वामनः विश्रान्तविद्याधर सं ४००-६००

६॥पाल्यकिर्तिः जैनशाकटायन सं ६२४-८७१

७॥शिवस्वामिः - सं ६१४-६६०

८॥भोजदेवः सरस्वतिकण्ठाभरणम् सं १०७५-१११०

९॥बुद्धिसागरः बुद्धिसागर सं १०८०

१०॥भद्रेश्वरसुरिः दीपक सं १२००तः पूर्वं

११॥हेमचन्द्रः हैमव्याकरणम् सं ११४५-१२२६

१२॥अकलङ्कः अकलङ्कव्याख्या सं ७००-८००

१३॥क्रमदिश्वरः जौमर वि १००तः पूर्वं

१४॥अनभूतिस्वरूपः सारस्वतम् सं १२५०

१५॥वोपदेवः मुग्धबोधः सं १२८७-१३५०

१६॥पद्मनाभः	सुपद्मम्	वि १४शताब्दि

१७॥विनयसागरः	भोजव्याकरणम्	सं १६५०-१७००

अनेन वयं पाणिनीयव्याकरणपरम्परां द्रष्टुं शक्नुमः।

प्रथमविभागेऽस्माभिः पाणिनिजीवनचरितं पठितं। तेषां कृति विषये पूर्वमेव ज्ञातम्। अत्र येषां पाणिनिव्याकरणे योगदानं वर्तते।
तेषां तदुत्तरवर्तीणाम् व्याकरणाचार्याणां चर्चां - करिष्यामः।

वार्तिककारकात्यायनः

अनेके आचार्याः पाणिन्यष्टकोपरि वार्तिकसूत्राण्यरचयन् । महाभाष्ये निम्नोक्त वार्तिककाराणामुल्लेखः प्राप्यते। अज्ञाताचार्याणांकृते अपर आह इति निर्देशोऽस्ति।

१ कात्यायनः २ भारद्वाजः ३ सुनागः ४ क्रोष्टा ५ बाडवः ६ व्याघ्रभूतिः ७ वैयाघ्रपादः इति। एतेषु कात्यायनस्यैव वार्तिकपाठः सुप्रसिद्धः वर्तते ।

वार्तिकलक्षणं यथा -

उक्तानुक्तदुरुक्तानां चिन्तायत्र प्रवर्तते ।

तं ग्रन्थं वार्तिकं प्राहुः वार्तिकज्ञा मनीषिणः [२२]॥ पराशरउपपुराण अ.१५

प्रयोजनं संशयनिर्णयौ च व्याख्याविशेषो गुरुलाघवं च।

कृतव्युदासोऽकृतशासनं च स वार्तिको धर्म गुणोऽष्टकश्च [२३]॥

का पुनर्वृत्तिः। परार्थाभिधानं वृत्तिः।

कात्यायनः

व्याकरणस्य मुनित्रयेषु कात्यायनः द्वितीयमुनिरुपेण वर्तते। महाभाष्यकारः कात्यायनस्य वार्तिककाररुपेणोल्लेखः करोति [२४]। पुरुषोत्तमदेवेन त्रिकाण्डशेषकोषे कात्यायनस्य षड् नामानि लिखितानि सन्ति । मेधाजित्कात्यायनश्च पुनर्वसुर्वररुचिः। प्राचीनवाङ्गमये अनेककात्ययनानामुल्लेखः प्राप्यते। स्कन्दपुराणानुसारं कात्यायनः याज्ञवल्कस्य पुत्रः आसीत्।

कात्यायनाभिधं च यज्ञविद्याविचक्षणम् ।

पुत्रो वररुचिर्यस्य बभूव गुणसागरः॥ (स्कन्दपुराण)

---

[२२] पराशरउपपुराण

[२३] विष्णुधर्मोत्तरपुराण

[२४] सिद्धत्येव यत्त्विदं वार्तिककारः पठति ।विप्रतिषेधात् टाबो वलित्वम् इति एतद् संगृहितं भवति । ७।१।१

कालः

कात्यायनस्य कालः पाणिनेः किञ्चिदुत्तरवर्ती वा समकालिककालः भवितुमर्हति। अतः विक्रमसंवत् तः २६००- ३००० वर्षपूर्वं गण्यते । महाभाष्येनानुमीयते यत् कात्यायनः दाक्षिणात्यासीत् । प्रियतद्धिितादाक्षिणात्याः।
यथा लोके वेदे चेति प्रयोक्तव्ये यथा लौकिकवैदिकपु प्रयुञ्जते।

वार्तिकपाठः

कात्यायनस्य वार्तिकपाठः पाणिनीयव्याकरणस्य अत्यन्तमहत्वपूर्णमङ्गमस्ति। कात्यायनस्य वार्तिकपाठेन विना पाणिनीयव्याकरणमपूर्णं प्रतिभाति। सम्प्रति कात्यायनस्य वार्तिकपाठः स्वतन्त्ररुपेण न प्राप्यते। महाभाष्येऽपि कात्यायनवार्तिकाणां निश्चित संख्या न प्राप्यते। यतो हि महाभाष्येऽन्यवार्तिककाराणामपि वचनानि संगृहितानि सन्ति। आधुनिकवैयाकरणैः सिद्धे शब्दर्थ सम्बन्धे इति वार्तिकं आदिमं गणयन्ते ।

युधिष्ठिरमीमांसकमतानुसारेण कात्यायनस्य प्रथमवार्तिकं " रक्षोहागमलघवसन्देहाः प्रयोजनम् " अस्तीति कथयति। तत्र सायणकृत भाष्यस्य उपोद्घातं प्रमाणरूपेण दर्शयति। सायणः तत्र लिखति तस्यैतस्य व्याकरणस्य प्रयोजन विशेषो वररुचिना वार्तिके दर्शितः - रक्षोहागमलघवसन्देशः प्रयोजनम् इति। एतानि रक्षादीनि प्रयोजनानि प्रयोजनान्तराणि च महाभाष्ये पतञ्जलिना स्पष्टी कृतानि।